# Guru Stuti 3

# ગુરુસ્તુતિઃ ૩

## Document Information

Text title : gurustutiH 3

File name : gurustutiH3.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Transliterated by : Girdhari Lal Koul glkoul.18 at gmail.com

Proofread by : Girdhari Lal Koul glkoul.18 at gmail.com

Latest update : December 6, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# Guru Stuti 3

# ગુરુસ્તુતિઃ ૩

ૐ શિવાય ગુરવે નમઃ ।

ૐ તત્ત્વોત્તીર્ણોઽતુલ-નિજ-ચમત્કારપૂર્ણો હ્યનન્યા
પેક્ષી સ્વૈરી કચનપરમો ભૈરવો બોધભાનુઃ ।
માલિન્યાન્ધ્યં ત્રિવિધમખિલં નાશયિત્વાહૃદબ્જ-
સઙ્કોચં નઃ સ્વકરનિકરેણોદિતઃ સન્ધુનોતુ ॥ ૧॥

યા વ્યક્તેઃ પ્રાક્ કિલ પરમહામન્ત્રભૂમિઃ પરાખ્યા
પશ્યન્તી તામુપગતવતી ઘોતયન્ત્યર્થજાતમ્ ।
ભેદામર્શારચન-કુશલા મધ્યમા વૈખરી યા
વ્યક્તા સંવિલ્લસતુ હૃદિનઃ ક્ષોભતૂલાગ્નિહેતિઃ ॥ ૨॥

શ્રી શ્રીકણ્ઠાદનુપમ-ફલા યાહિ સન્તાન-શાખા
યાતા તસ્યાં સમધિગતવાન્ શૈશવે શક્તિપાતાત્ ।
શ્રીરામાખ્યં ગુરુમથ ચ તત્ સેવયાવાપ્તધીર્યઃ
તં શ્રીવિદ્યાધર-ગુરુવરં સ્વાત્મરામં નમામિ ॥ ૩॥

દેહાધ્યાત્મે ત્યખિલ જગતામાન્ધ્યપૂર્ણો વિવાદઃ
તુચ્છોચ્છેદ્યો યદપિચ શિવઃ શાસ્તિ ચૈતન્યમાત્મા ।
આમૃશ્યૈવં વિપિનમગમદ્રાગજાલસ્ય છિત્યૈ
તં શ્રીવિદ્યાધરગુરુવરં સ્વાત્મ-રામં નમામિ ॥ ૪॥

કાર્કોટાહેર્ગહન ભવને હિંસ્ત્ર-જીવૈઃ પરીતે
શાક્રસ્ફારાતિશય-વિમલો જાતસંવિદ્-વકાસઃ ।
ક્રુધ્દ્વા હિંસ્રા ગુરુ-વર-ધિયા મસ્તકૈર્યં પ્રણેમુઃ
તં શ્રીવિધ્યાધર-ગુરુ-વરં સ્વાત્મ-રામં નમામિ ॥ ૫॥

યસ્યા-ભૂમ્ના ચકિત-ચકિતોઽભૂદયં મર્ત્યવર્ગઃ
પાદૌ સ્પૃષ્ટં દ્રુતમુપયયૌ પ્રાવૃણો-ચ્ ચાશ્રમં તત્ ।
નૈતત્ શર્મેત્યમર વિવરં પ્રાપ યઃ શૈવધર્મા

તં શ્રીવિધ્યાધર-ગુરુ-વરં સ્વાત્મરામં નમામિ ॥ ૬॥

આશ્યાનોયં ચિતિરસ-મયઃ સર્વતો ભાવવર્ગઃ
નાનારૂપં શ્રયતિ દ્રવતામાગતોઽવ્યક્તતાં ચ ।
ઇત્યાનીતઃ સ્વગૃહમમરે-શેનયઃ શિક્ષણાર્થં
તં શ્રીવિધ્યાધર-ગુરુ-વરં સ્વાત્મરામં નમામિ ॥ ૭॥

સ્વાનારણ્યા વટ-ઝર-મહીધ્રેશુચીર્ણવ્રતો યો
યોગક્ષેમી વિતરણમતિશિચન્તયદાત્મજ્ઞાનમ્ ।
દાનં ભૂત્યૈ ભવતિ જગતાં શિક્ષિયંશ્ચાવિનીતાન્
તં શ્રીવિદ્યાધર-ગુરુ-વરં સ્વાત્મરામં નમામિ ॥ ૮॥

ક્રીડાશીલો વલિત-સ્વતનુશ્ચેત્યસઙ્કોચધર્મા
સંસારી સ્યાચ્છિવ ઇત્યુદિતં શક્તિસૂત્રેષુ સમ્યક્ ।
તત્રોપાયં સ્વકરમવિદદ્દુધમો ભૈરવો યઃ
તં શ્રીવિદ્યાધર-ગુરુવરં સ્વાત્મરામં નમામિ ॥ ૯॥

શૈવામ્નાય-પ્રવચન-રતિ-શઙ્કરો યો હિ દેવઃ
પીયૂષાંશુઃ ઇવ મુખ-રુચા હ્લાદયન્ શિષ્યસઙ્ઘાન્ ।
દીપ્ત્યા ભાસ્વાન્ ઇવ હૃદયપં કેરુહોદ્-બોધહેતુઃ
તં શ્રીવિદ્યાધર-ગુરુવરં સ્વાત્મરામં નમામિ ॥ ૧૦॥

જજ્ઞે લગ્ને ધનુષિ સવિધૌ યસ્તુમીનેઽથ કેતૌ
ભૌમે સૌરે રતિગૃહગતે કર્કટે ચોષ્મરશ્મૌ ।
શુક્રે જ્ઞેજ્યે નવમગૃહગે કન્યકાયાં ચરાહૌ
તં શ્રીવિધ્યાધર-ગુરુવરં સ્વાત્મરામં નમામિ ॥ ૧૧॥

ભૂયઃ સ્યાત્પ્રતિમેલનં પ્રતિભુવઃ સૂત્રં શિવસ્યાન્તિમમ્
સમ્યક્ યોપ્યવધાર્ય શાશ્વતપદં શૈવં સહસ્યામલે ।
બાણ-દ્વય-ભ્ર-શરે સમેઽપિચ તૃતીયસ્યાં નિશાન્તે યયૌ
શ્રીવિધ્યાધર સ્વામિ-દૈશકમણિર્ભૂયાદઘધ્વંસકૃત્ ॥ ૧૨॥

યત્પાદ-પદ્મ-સંસ્પર્શાત્ સત્ત્વરં શ્યામચેતસામ્ ।
સુન્દરો જાયતે બોધઃ શરણં સોઽસ્તુ નઃ શિવઃ ॥ ૧૩॥

ઇતિ શ્રીવિધ્યાધરગુરુસ્તુતિઃ સમાપ્તા ।

Encoded and proofread by Girdhari Lal Koul glkoul.18 at gmail.com

*Guru Stuti 3*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*